मानस्वरस्य उपर्युक्त-रेखा-चित्रणे सुस्पष्टमिदम् यत् इ, ए, ऍं, अ, इति चत्वारः अग्रस्वराः तथा उ, ओ, ऑं, आ इति चत्वारः पश्चस्वराः सन्ति। एतेषु अष्टस्वरेषु इ, उ संवृतौ; ए, ओ अर्धसंवृतौ; ऍं, ऑं अर्ध-विवृतौ; अ, आ इति विवृतौ स्तः।

## 4.6. ध्वनि-नियमाः (Phonetic-Laws)

ध्वनिप्रवृत्तिरेव भाषावैज्ञानिकैः 'ध्वनिनियमः' इत्युच्यते। सत्यं त्विदमस्ति यत् सर्वे ध्वनिनियमाः आदौ तु प्रवृत्तिस्वरूपाः एव भवन्ति; किन्तु यदा ते पूर्णतां यान्ति, तदा ध्वनिनियमाः इत्यभिधीयन्ते लोकैः।

ध्वनि-नियमाः प्राकृतिक-नियमवत् सार्वभौमाः नहि भवन्ति, अपितु ध्वनि-नियमाः कालसापेक्षाः भवन्ति। प्राकृतिक-नियमस्य अपवादो नैव दृश्यते, किन्तु ध्वनि-नियमस्य तु देश-काल-भाषा-परिस्थितिवशात् अपवादः भवत्येव। कस्मिंश्चित् कालविशेषे दशायां वा जातानि परिवर्तनानि 'ध्वनि-नियम'-शब्देन अभिधीयन्ते। इत्थं सुस्पष्टमिदं यत् भाषा-देश-कालेभ्यः सह सम्बद्धत्वात् इमे ध्वनिनियमाः सीमिताः भवन्ति।

अत्र प्रसिद्धाः त्रिविधाः ध्वनिनियमाः संक्षेपेण प्रस्तूयन्ते, येषां नामानि अधोलिखितानि सन्ति—

1. ग्रिम-नियमः (Grimm's Law),
2. ग्रासमन-नियमः (Grassman's Law),
3. वर्नर-नियमः (Verner's Law)।

(1) **ग्रिम-नियमः** (Grimm's Law)—ग्रिमनियमस्तु ध्वनिनियमस्य सर्वाधिकं प्रसिद्धम् उदाहरणमस्ति। नियमस्यास्य अन्वेषणं यद्यपि रास्क-इरिमहोदयाभ्यां पूर्वमेव कृतमासीत्; किन्तु जैकब-ग्रिममहोदयेन व्यवस्थितरूपेण सम्पादितोऽयं नियमः ग्रिम-महोदयस्य नाम्ना एव अभिधीयते। ग्रीक-संस्कृत-लैटिन-जर्मनादि-भारोपीयभाषाणां तुलनाप्रसंगे जैकबग्रिममहोदयेन दृष्टमिदं यत् मूलभारोपीयध्वनयः जर्मनिकशाखायां भिन्न-प्रकारेणैव उपलभ्यन्ते। अतः तेषां ध्वनीनां सूक्ष्म-निरीक्षणं परीक्षणं च कृत्वा ग्रिम-महोदयः नियमशृंखलायां निबद्धमकरोत्। नियमस्यास्य सम्बन्धः द्वाभ्यां परिवर्तनाभ्यां सह वर्तते। इमौ द्वौ ध्वनिनियमौ प्रथमध्वनिपरिवर्तनम्, द्वितीय-ध्वनिपरिवर्तनमिति नामाभ्याम् अभिधीयेते।

(i) **प्रथम-ध्वनिपरिवर्तनम्**—परिवर्तनमिदं प्रागैतिहासिक-कालिकमस्ति। ग्रिम-महोदयस्यानुसारेण मूलभारोपीय-ध्वनयः संस्कृत-ग्रीक-लैटिनभाषासु सुरक्षिताः सन्ति; किन्तु व्यंजनानि तु संस्कृतभाषायामेव विशुद्धरूपेण उपलभ्यन्ते। एतेषां व्यञ्जनानां परिवर्तितं रूपं जर्मनिकशाखायां उपलभ्यते। ज्ञातव्यमस्ति यत् प्रथमध्वनिपरिवर्तनस्य सम्बन्धः क् त् प्, घ् ध् भ् (ख् थ् फ्), ग् द् ब् इति नवभिः स्पर्शव्यञ्जनैः सह वर्तते। अध्ययन-सौकर्यदृष्ट्या नियमस्यास्य सारणीयमत्र प्रस्तूयते—

| मूलभारोपीय-ध्वनयः (संस्कृत-ग्रीक-लैटिनादिः) | जर्मनिक-ध्वनयः (गाथिक-अंग्रेजी-डच-निम्नजर्मनादिः) |
|---|---|
| क् त् प् (अघोषाः अल्प-प्राणाश्च) | ख् थ् फ् (घोषाः महाप्राणाश्च) |
| घ् ध् भ् (घोषाः महाप्राणाश्च) | ग् द् ब् (घोषाः अल्पप्राणाश्च) |
| ग् द् ब् (घोषाः अल्पप्राणाश्च) | क् त् प् (अघोषाः अल्पप्राणाश्च) |

प्रथम-ध्वनिपरिवर्तनमिदम् सूत्ररूपेण अधोलिखितेन रेखा-चित्रेणापि प्रस्तुतमस्ति—




अनेन रेखाचित्रेण सुस्पष्टमिदं यत् मूलभारोपीय-भाषायाः अघोषाल्पप्राण-ध्वनयः जर्मेनिकशाखायां घोषमहाप्राणाः अभूवन्। एवमेव घोष-महाप्राणध्वनयः घोषाल्पप्राणाः अभूवन्। परिवर्तनेऽस्मिन् घोषाल्पप्राणध्वनयः अघोषाल्पप्राणाः अभूवन्।

(ii) **द्वितीय-ध्वनिपरिवर्तनम्**—परिवर्तनमिदं सप्तम-शताब्दी-ख्रीष्टाब्दीयः अस्ति। अनेन परिवर्तनेन निम्नजर्मनवर्गात् उच्चजर्मनवर्गस्य पार्थक्यं प्रदर्शितमस्ति। परिवर्तनेऽस्मिन् ग् द् ब् इत्येषां क् त् प्, क् त् प् इत्येषां स्थाने ख् थ् फ्, ख् थ् फ् इत्येषां स्थाने ग् द् ब् इति अभूवन्। अध्ययन-सौकर्यदृष्ट्या सरलीकृतम् इदं तथ्यमधोलिखितेन रेखाचित्रेण—




(2) **ग्रासमन-नियमः** (Grassman's Law)—ग्रिमाख्यस्य ध्वनिनियमस्य अनेके अपवादाः आसन्। येषां परिमार्जनं ग्रासमनमहोदयेन कृतम्। परिमार्जनोऽयं 'ग्रासमन-नियमः' इत्युच्यते भाषा-वैज्ञानिकैः। नियमेऽस्मिन् ग्रासमनमहोदयेन प्रतिपादितमस्ति यत् द्वौ सन्निकृष्टौ महाप्राणध्वनी (वर्णौ) साकं नहि भवतः, अपितु तयोः द्वयोः वर्णयोः एकः (प्रथमः) अल्पप्राणो भवति। यथा—संस्कृतभाषायां 'धा' धातोः 'धधाति' इति निष्पन्ने पूर्वधकारस्य स्थाने दकारः (अल्पप्राणः) इति

Scanned with CamScanner

जाते 'दधाति' इति निष्पन्नं भवति । एवमेव 'भृ' धातोः 'भिभर्ति' इत्यस्य स्थाने बिभर्ति, 'भभूव' इत्यस्य स्थाने बभूव इत्यादयः भवन्ति ।

(3) वर्नर-नियमः (Verner's Law)—ग्रिम-नियमस्य अपवादपरिमार्जकोऽयं वर्नर-नियमः । यद्यपि ग्रासमनमहोदयेन परिमार्जितोऽयं नियमः, तथापि अवशिष्टानां दोषाणामपवादानां वा उन्मूलनकर्ता तु वर्नरमहोदयः एवास्ति । नियमेऽस्मिन् वर्नर-महोदयेन प्रतिपादितमस्ति यत् यदि 'क् त् प्' इत्येषां वर्णानां पूर्ववर्तिस्वरे बलाघातो भवति, तर्हि ग्रिमनियमानुसारेण क् त् प् इत्येतेषु स्थानेषु 'ख् थ् फ्' इति परिवर्तनम् भवत्येव; किन्तु यदा बलाघातः परवर्तिस्वरे भवति, तदा 'क् त् प्' इत्येतेषु वर्णेषु स्थानेषु जर्मनभाषायां 'ग् द् ब्' इति परिवर्तनं भवति । यथा—संस्कृत-भाषायाः युवशस्, शतम्, सप्तन् इत्येतेषु स्थाने गाथिकभाषायां जुग्स (Juggs), हुन्द (Hund), सिबुन (Sibun) इति परिवर्तनं भवति । अत्र क्रमशः शकारस्य स्थाने गकारः, तकारस्य स्थाने दकारः तथा पकारस्य स्थाने बकारः इति सञ्जातः । स्वराघातविषयकः नियमोऽयं वर्नर-महोदयस्य प्रज्ञा-प्रकर्षं प्रद्योतयति ।

## वस्तुनिष्ठप्रश्नाः
## (Objective Questions)

1. भाषायाः मूलतमः संघटकः अस्ति—
   (A) ध्वनिः (B) लिपिः
   (C) शब्दः (D) अर्थः

2. भाषायाः लघुतम-सार्थक-इकाई का अस्ति ?
   (A) शब्दः (B) स्वनिम
   (C) अर्थः (D) शब्दार्थः

3. भाषाविज्ञानम् अस्ति—
   (A) ध्वनीनामध्ययनम्
   (B) ध्वनियन्त्राणामध्ययनम्
   (C) भाषाणामध्ययनम्
   (D) स्वरव्यञ्जनयोः अध्ययनम्

4. प्राचीनतमः भाषावैज्ञानिकः अस्ति—
   (A) प्लेटो (B) देवेन्द्रनाथशर्मा
   (C) ग्रासमन (D) पाणिनिः

5. "व्यक्ता वाचि वर्णा येषां त इमे व्यक्त वाचः" भाषायाः इयं परिभाषा कुतः उद्धृताऽस्ति ?
   (A) महाभाष्यतः
   (B) शब्दानुशा...

8. मेरियो-पाई-महोदयस्य मते विश्वेऽस्मिन् कति भाषाः सन्ति ?
   (A) 3000 (B) 2532
   (C) 124 (D) 2796

9. वर्गीकरणदृष्ट्या सर्वासाम् भाषाणाम् न्यूनातिन्यूनः कति-विभागः स्वीकृतः ?
   (A) 02 (B) 03
   (C) 04 (D) 05

10. परिवारमूलके वर्गीकरणे डॉ. देवेन्द्रनाथशर्मा कति भाषा-परिवारः स्वीकारोति ?
    (A) 15 (B) 18
    (C) 24 (D) 27

11. वैज्ञानिक-सांस्कृतिकदृष्ट्या सर्वप्रमुख-भाषापरिवारः कः ?
    (A) अमरीकीपरिवारः (B) हाइपरबोरीपरिवारः
    (C) भारोपीयपरिवारः (D) द्राविडपरिवारः

12. सर्वाधिकभाषाः कस्मिन् परिवारे समुपलभ्यन्ते ?
    (A) भारोपीयपरिवारे (B) सामीपरिवारे
    (C) आस्ट्रेलियाईपरिवारे (D) अमरीकीपरिवारे

13. साहित्यिकदृष्ट्या सर्वाधिक-समृद्धः भाषा-परिवारः कः ?

Scanned with CamScanner